# Rishigautamaproktam Umamaheshvarabahyapyupacharapujavarnanam

# ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરબાહ્યાપ્યુપચારપૂજાવર્ણનમ્

## Document Information


Text title : Rishigautamaproktam Umamaheshvarabahyapyupacharapujavarnanam

File name : umAmaheshvarabAhyApyupachArapUjAvarNanam.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 22| 208-248||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

Rishigautamaproktam Umamaheshvarabahyapyupacharapujavarnanam

# ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરબાહ્યાપ્યુપચારપૂજાવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

ગૌતમ ઉવાચ

તતઃ પુષ્પાણિ સઙ્ગૃહ્ય શિવમાવાયેચ્છિવામ્ ।
મહાદેવ કૃપાસિન્ધો વિશ્વવન્દ્યપદામ્બુજ ॥ ૨૦૮॥

આવાહયામિ દેવેશ પ્રસીદ પરમેશ્વર ।
લક્ષ્મ્યાદિદેવવનિતાપરિષેવિતપાદુકે ॥ ૨૦૯॥

આવાહયામિ દેવેશિ પ્રસીદ પરમેશ્વરિ ।
ગૃહાણ સોમ વિશ્વાત્મન્નાસનં રત્નનિર્મિતમ્ ॥ ૨૧૦॥

અનન્તાસન વિશ્વેશ કરુણાસાગર પ્રભો ।
ઉમે સોમસમાશ્લિષ્ટે સોમાર્ધકૃતશેખરે ॥ ૨૧૧॥

નાનારત્નસમાકીર્ણમાસનં પ્રતિગૃહ્યતામ્ ।
અર્ઘ્યં ગૃહાણદેવેશ સપુષ્પં ગન્ધસંયુતમ્ ॥ ૨૧૨॥

શિવાનન્તગુણગ્રામ સર્વાભીષ્ટપ્રદાયક ।
ગૃહાણાર્ઘ્યં શિવે નિત્યં સર્વાવયવશોભિનિ ॥ ૨૧૩॥

શિવપ્રિયે શિવાકારે નિત્યં ભક્તવરપ્રદે ।
પાદ્યં ગૃહાણ ગૌરીશ હેમપાત્રસ્થિતં નવમ્ ॥ ૨૧૪॥

ગૃહાણ દેવિ પાદ્યં ત્વં વેદવેદાન્તસંસ્તુતે ।
ગૃહાણાચમનં શમ્ભો કલ્પિતં નિર્મલ પ્રભો ॥ ૨૧૫॥

નિર્મલે નિર્મલાકારે ગૃહાણાચમનીયકમ્ ।
મધુપર્કં ગૃહાણેશ સચ્ચિદાનન્દવિગ્રહ ॥ ૨૧૬॥

મધુપર્કપ્રદાનેન પ્રીતો ભવ મહેશ્વર ।

મધુપર્કમિદં દેવિ સ્વીકુરુ પ્રિયશઙ્કરે ॥ ૨૧૭॥

મધુપર્કપ્રદાનેન પ્રીતા ભવ સુશોભને ।
શિવ શમ્ભોઽમૃતસ્નાનં સ્વીકુરુષ્વ કૃપાનિધે ॥ ૨૧૮॥

સર્વતીર્થમય સ્વામિન્ સર્વપાવનપાવન ।
શિવે પઞ્ચામૃતસ્નાનં સ્વીકુરુષ્વ શિવપ્રિયે ॥ ૨૧૯॥

સૃષ્ટતીર્થોત્તમે શુદ્ધે તીર્થરાજનિષેવિતે ।
શમ્ભો શુદ્ધોદકસ્નાનં સ્વીકુરુષ્વ સુરોત્તમ ॥ ૨૨૦॥

પ્રસીદ કૃપયા ભક્તં પાહિ માં પાર્વતીપતે ।
શિવે શુદ્ધોદકસ્નાનં ગૃહ્યતાં મીનલોચને ॥ ૨૨૧॥

પ્રસીદ દેવિ દીનં ત્વં પાહિ માં શરણાગતમ્ ।
સોત્તરીયં સઙ્ગ્રહાણ દુકૂલમિદમુત્તમમ્ ॥ ૨૨૨॥

પાહિ પાહિ કૃપાસિન્ધો કરુણાવરુણાલય ।
સોત્તરીયં ગૃહાણેદં દુકૂલં શઙ્કરપ્રિયે ॥ ૨૨૩॥

પ્રસીદ પાહિ માં દીનમનન્યશરણં શિવે ।
ઉપવીતં ગૃહાણેશ શમ્ભો ચન્દ્રાર્ધશેખર ॥ ૨૨૪॥

ગૃહ્યતામુપવીતં યન્નવતન્તુવિનિર્મિતમ્ ।
દેવિ દેવાધિદેવેશિ યથાશક્ત્યુપકલ્પિતમ્ ॥ ૨૨૫॥

ગૃહાણ ચન્દનં દેવ નાનાગન્ધોપકલ્પિતમ્ ।
પ્રસીદ પાર્વતીનાથ શરણાગતવત્સલ ॥ ૨૨૬॥

ગૃહાણ ચન્દનં દેવિ કસ્તૂરીકુઙ્કુમાઞ્ચિતમ્ ।
વિશ્વં વિશ્વાત્મિકે પાહિ વિશ્વનાથપ્રિયે સદા ॥ ૨૨૭॥

ગૃહાણાભરણાનીશ નિરીશ નિગમાશ્રય ।
વિશ્વાભરણ વિશ્વેશ રત્નાભરણભૂષિત ॥ ૨૨૮॥

ગૃહાણાભરણાન્યમ્બ સર્વાભરણભૂષિતે ।
સર્વપ્રિયે જગદ્વન્દ્યે જગદાનન્દદે શિવે ॥ ૨૨૯॥

ગૃહાણ બિલ્વપત્રાણિ પુષ્પાણિ ચ મહેશ્વર ।
સુગન્ધીનિ નવાનીશ સબિલ્વકુસુમપ્રિય ॥ ૨૩૦॥

ગૃહાણ બિલ્વપત્રાણિ નૂતનાનિ શિવપ્રિયે ।
નાગપુન્નાગમન્દારમાલિકાસમલઙ્કૃતે ॥ ૨૩૧॥

દશાઙ્ગં ગુગ્ગુલું ધૂપં સગોઘૃતમનુત્તમમ્ ।
ગૃહાણ પાર્વતીનાથ ઘ્રાણતર્પણમાદરાત્ ॥ ૨૩૨॥

દશાઙ્ગં ગુગ્ગુલું ધૂપં સગોઘૃતમનુત્તમમ્ ।
ગૃહાણ ભક્તવરદે લક્ષ્મીવાણ્યાદિસેવિતે ॥ ૨૩૩॥

સાજ્યં ત્રિવર્તિવિસ્ફૂર્જદ્દીપં શિવ શિવાપતે ।
ગૃહાણાનન્તસૂર્યાગ્નિચન્દ્રપ્રભ નમોઽસ્તુ તે ॥ ૨૩૪॥

સાજ્યં ત્રિવર્તિવિસ્પૂર્જદ્દીપમીશાનવલ્લભે ।
ગૃહાણ ચન્દ્રસૂર્યાગ્નિમણ્ડલાધિકસુપ્રભે ॥ ૨૩૫॥

શમ્ભો ગોઘૃતસંયુક્તં પરમાન્નં મનોહરમ્ ।
સશર્કરં ગૃહાણેશ નિત્યતૃપ્ત મહેશ્વર ॥ ૨૩૬॥

શિવે ગોવૃતસંયુક્તં પરમાન્નં મનોહરમ્ ।
સશર્કરં ગૃહાણામ્બ પરમાન્નપ્રદાયિનિ ॥ ૨૩૭॥

શમ્ભો ગૃહાણ ગન્ધાઢ્યમિદમાચમનીયકમ્ ।
નિવેદનાન્તે દેવેશ કલ્પિતં શુદ્ધવિગ્રહ ॥ ૨૩૮॥

શિવે ગૃહાણ ગન્ધાઢ્યમિદમાચમનીયકમ્ ।
શુદ્ધે શુદ્ધિપ્રદે દેવિ શિવવામાઙ્ગરૂપિણિ ॥ ૨૩૯॥

નીરાજનં ગૃહાણેશ બહુદીપવિરજિતમ્ ।
સ્વપ્રકાશ પ્રકાશાત્મન્પ્રકાશિતદિગન્તર ॥ ૨૪૦॥

નીરાજનં ગૃહાણામ્બ સૂર્યચન્દ્રાગ્નિલોચને ।
પ્રભાપૂરિત (સમ્પૂર્ણ) સર્વાઙ્ગે મઙ્ગલે મઙ્ગલાસ્પદે ॥ ૨૪૧॥

શમ્ભો ગૃહાણ તામ્બૂલમેલાકર્પૂરસંયુતમ્ ।
પ્રસીદ ભગવન્ શમ્ભો સર્વજ્ઞામિતવિક્રમ ॥ ૨૪૨॥

શિવે ગૃહાણ તામ્બૂલમેલાકર્પૂરસંયુતમ્ ।
પ્રસીદ સસ્મિતે દેવિ શિવાલિઙ્ગિતવિગ્રહે ॥ ૨૪૩॥

ગૃહાણ પરમેશાન સરત્ને છત્રચામરે ।
દર્પણં વ્યજનં ચેશ સર્વદુઃખવિનાશક ॥ ૨૪૪॥

ગૃહાણેમે સુરારાધ્યે સરત્નેછત્રચામરે ।
દર્પણં વ્યજનં ચાદ્યે વિદ્યાધારે નમોઽસ્તુ તે ॥ ૨૪૫॥

પ્રદક્ષિણનમસ્કારાન્ગૃહાણ પરમેશ્વર ।
નર્તનં ચ મહાદેવ નાટ્યપ્રિય નમોઽસ્તુ તે ॥ ૨૪૬॥

પ્રદક્ષિણનમસ્કારાન્ગૃહાણ પરમેશ્વરિ ।
નર્તનં ચ મહાદેવિ શિવનાટ્યમ્પ્રિયે શિવે ॥ ૨૪૭॥

એવં પ્રયત્નતઃ કૃત્વા શિવયોઃપૂજનં શિવમ્ ।
શિવં શિવાં ચ યત્નેન પુનઃ સમ્પૂજયેત્પુનઃ ॥ ૨૪૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં ઉમામહેશ્વરબાહ્યાપ્યુપચારપૂજાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૨। ૨૦૮-૨૪૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 22 . 208-248..

Notes:

Having described about the UmāMaheshvara Dhyānam ઉમામહેશ્વર ધ્યાનમ્ as part of the UmāMaheshvara Vrata ઉમામહેશ્વર વ્રત, Ṛṣi Gautama ઋષિ ગૌતમ further elaborates about the UmāMaheshvara Pūjā ઉમામહેશ્વર પૂજા by external means.

In this Chapter 22, Ṛṣi Gautama ઋષિ ગૌતમ further details about the UmāMaheshvara AṅgaPūjā ઉમામહેશ્વર અઙ્ગપૂજા with mantra મન્ત્ર.

Proofread by Ruma Dewan

*Rishigautamaproktam Umamaheshvarabahyapyupacharapujavarnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*